1

वा
१

श्रीरामः स्वनिष्ठबाधप्रतिबध्यतावच्छेदकविषयित्वघटितधर्मावच्छिन्ननिबंधकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नाया
साध्यवत्तानिश्चयव्यापकप्रतिबंधकतानिरूपितप्रतिबध्यतानवच्छिन्नज्ञानत्वेन पक्षतया हेतुत्वमुक्तं भट्टाचार्येण तत्र बाधप्रतिबध्य
तायाः साध्याभावत्वावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यतावच्छिन्नप्रतिबंधकतानिरूपितत्वेन निवेशे पर्व
तो वह्निमानित्यादौ पर्वतो वह्न्यभाववान् पर्वतो वह्निमान्न वेत्याकारकसंशये ऽतिव्याप्तिस्तादृशसंशये साध्याभावप्रकारतानिरूपितपक्षता
वच्छेदकावच्छिन्नविशेष्यत्वघटितधर्मावच्छिन्नायास्साभावाप्रकोटिकनिश्चयत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छे
दकभावाकोटिप्रकारत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकघटकधर्मावच्छिन्नसाध्यवत्तानिश्चयप्रतिबध्यतास
त्वात् नच साध्याभावप्रकारतानिरूपितपक्षविशेष्यत्वामेव प्रकारत्वानवच्छिन्नत्वे विशेष्यता तादृशसंशयीयाभावकोटिनिष्ठविशेष्य रा
तानिरूपितप्रतियोगित्वसंबंधावच्छिन्नप्रकारत्वावच्छिन्नायावह्न्यभावप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतया अस्त्वावच्छि १
न्नाप्रतिबंधकताया आदाय न तोक्तसंशये ऽतिव्याप्तिरिति वाच्यं पर्वतत्वधर्मितावच्छेदकतापन्नवह्न्यभावं प्रति योग्यंशे प्रकारतया

वगाहमानायाः पर्वतः पर्वतवृत्त्यभावव्यक्त्यभाववानितिप्रतीतेः पर्वतोवह्न्यभाववान्पर्वतत्वानितिज्ञानंप्रतिप्रतिबंध — सोवार
पाच्च अवश्यमंतव्यनिरुक्तसंशयीयाभानिष्ठविषयतानिरूपितप्रतियोगित्वसंबंधावच्छिन्नप्रकारतावच्छेद्यताकायनिक्तसं
शयीयाभावकोटिप्रविष्टपर्वतरूपपक्षविशेष्यतायावारणसंभवेपितादृशसंशयीयाभावकोटीप्रकारकबुद्धिंप्रतिवन्ह्यभा
ववत्पर्वतः पर्वतवृत्त्यभावप्रतियोगितिनिश्चयस्यापिप्रतिबंधकत्वपातात्तादृशप्रतिबंधकतावच्छेदिकायावन्ह्यभावप्रकारता
निरूपितपर्वतविशेष्यतायाः प्रकारत्वानवच्छिन्नतयाचतादृशप्रतिबंधकतामादायनिरुक्तसंशये: निव्याप्तिसंभवात् नच
2 रुक्तज्ञानयोः प्रतिबंधकताद्वयमेवसाध्याभावप्रकारतानिरूपितायाविष॥यत्वानवच्छिन्नपक्षविशेष्यत्वानदवच्छिन्नत्वनि
वेशाद्वारणीयंवन्ह्यभाववत्पर्वतः पर्वतवृत्त्यभावप्रतियोगीतिज्ञानीयवन्ह्यभावप्रकारतानिरूपितपर्वतविशेष्यतायाः प्रका
रत्वानवच्छिन्नत्वेपिनिरुक्तप्रतियोगित्वप्रकारतानिरूपितविशेष्यत्वावच्छिन्नत्वमात्रेनविषयत्वावच्छिन्नत्वस्याक्षतत्वात नी
लपर्वतोवह्निमानित्यादावव्याप्त्याशंकाचनीलत्वप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताभिन्नविषयत्वानवच्छिन्नत्वनि

वैशाद्यारणीयासाध्यपक्षत्वादेकार्य्यकारणभावस्य नानात्वादिति वाच्यं यतः पर्वतत्वधर्मितावच्छेदकतापन्नं वह्न्यभावं निरुक्तप्र
२ नियोगित्वधर्मितावच्छेदकतया अवगाहमानानां पर्वतेन्त्यभाववान् पर्वतवृत्त्यभावप्रतियोगीनिमतीनौ पर्वतो वन्ह्यभाववान्
पर्वतवान् इति ज्ञानस्य प्रतिबंधकतां वारयितुं वन्ह्यभावछिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यत्वावच्छिन्नायास्तादृ
शप्रतियोगित्वप्रकारतानिरूपितविशेष्यतात्वत्वानिश्चयत्वेन कल्पितप्रतिबंधकतानिर्वाहाय तादृशविशेष्यतेनादृशप्रतियो
गित्वप्रकारतानिरूपितविशेष्यत्वावच्छिन्नत्वस्य तदवच्छिन्नकस्य वा विनिगमनाविरहेण कल्पनमयुक्तं पर्वतवृत्त्यभावप्रतियो
गी पर्वतवह्न्यभाववान् वन्ह्यभाववानित्याकारिकायाः निरु‾प्रतियोगित्वप्रकारतानिरूपितविशेष्यतावच्छेदकतापन्नपर्वतत्वं तादृ
शप्रतियोगित्वं च धर्मितावच्छेदकीकृत्य प्रकारतया वह्न्यभावमवगाहमानायाः पर्वतवृत्त्यभावप्रतियोगिपर्वतो वह्निमानित्या राम
कारकज्ञानस्य सत्याप्रतिबंधकत्वोपपत्तये विनिगमनाविरहेण वश्यस्वीकरणीयपरंपरावच्छेद्यावच्छेदकभावापन्नवह्न्य २
भावप्रकारतानिरूपितपर्वतविशेष्यत्वनिरुक्तप्रतियोगित्वप्रकारतानिरूपितपर्वतविशेष्यत्वद्वयशालिन्याः प्रतीतेः पर्वतो वह्न्य

भाववत्पर्वतत्वानिति ज्ञानं प्रत्यप्रतिबंधकत्वनिर्वाहाय पर्वतावच्छिन्नविशेष्यतानिरूपिताया वन्ह्यभाववत्तावच्छिन्नप्रकारतानद
च्छिन्नावच्छेदकताक विशेष्यतानिरूपितपर्वतवृत्त्यभावप्रतियोगित्वप्रकारताशालिनिश्चयत्वेनैव प्रतिबंधकत्वं कल्प्यनेन विशि
ष्यतायोरवच्छेद्यावच्छेदकभावविनापि प्रागुक्तस्य पर्वतवन्ह्यभाववान् पर्वतवृत्त्यभावप्रतियोगीति ज्ञानस्य वारणसंभवात् नच प
र्वतवृत्त्यभावप्रतियोगित्वप्रकारतानिरूपितविशेष्यतावच्छेदकतापन्नवन्ह्यभावं तादृशप्रतियोगित्वं च पर्वतत्वावच्छिन्नांशेऽव
गाहिनो ज्ञानस्य पर्वतः पर्वतवृत्त्यभावप्रतियोगिवन्ह्यभाववानित्याकारकं परस्परविशेषणविशेष्यतावच्छेदकभावापन्नप
र्वतवृत्त्यभावप्रतियोगित्ववन्ह्यभावोभयरूपेण प्रतियोगितयाऽवगाहि पर्वतविषयकभेदवद्बुद्धेः परस्परविशेषणविशेष्यतावच्छे
दकभावापन्नवन्ह्यभावपर्वतवृत्त्यभावप्रतियोगित्वे एकत्र द्वयमिति रीत्या पर्वतत्वावच्छिन्नांशेऽवगाहिन्यां वन्ह्यभाववत्पर्व
तवृत्त्यवप्रतियोगीति पर्वतइत्याकारप्रतीतावप्रतिबंधकत्वसंपत्तये वन्ह्यभावतादृशप्रतियोगित्वोभयप्रकारतानिरूपितप
र्वतविशेष्यताशालिनिश्चयत्वेन प्रतिबंधकतामपहाय अवश्यमंगत्वस्य एवच्छेद्यावच्छेदकभावापन्नतादृशप्रतियोगित्वप्र

प्रतियोगित्वप्रकारतानिरूपितविशेष्यतावच्छेदकत्वपर्वतनिष्ठविशेष्यतानिरूपितवन्ह्यभावत्वावच्छिन्नप्रकारत्वेनदुभयशालिनः प
३ र्वतवन्ह्यभाववत्पर्वतवानिति। ज्ञानं प्रतिबंधकतापत्तिभिया निरुक्तप्रकारत्वधर्मितावच्छेदकत्वयोरवच्छेद्यावच्छेदकभावं स्वीकुर्व
तापि विशेष्यतयोरवच्छेद्याभावः स्वीकर्तव्यः ननु स्वीकारे च पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवन्ह्यभावत्वावच्छिन्नप्रकारत्वावच्छि
न्नावच्छेदकतानिरूपिका या नत्वभावत्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नाता तादृशप्रतियोगित्वप्रकारतानिरूपि
तविशेष्यतातच्छालिज्ञानत्वमेव प्रतिबंधकत्वं शुच्यते न तत्त्व पर्वतता तादृशप्रतियोगिवन्ह्यभाववानिति ज्ञानं वारितमायातमपि
विशेष्यतयोरवच्छेद्यावच्छेदकभावेनेतिवाच्यं तन्निरुक्तरूपेण प्रतिबंधकत्वेपि पर्वतः पर्वतवृत्त्यभावप्रतियोगिवन्ह्यभाववद्घ(
इत्याकारस्य विशेषणविशेष्यतावच्छेदकभावान्न वन्ह्यभावधत्वोभयावच्छिन्नविशेष्यतापन्नता तादृशप्रतियोगित्वं तादृशा राम
भावापन्नता तादृशधर्मेयं च एकत्र द्रूपमिति रीत्या पर्वतत्वगाहिनो ज्ञानस्य वारणासंभवता तादृशप्रतियोगिवन्ह्यभाववानिति ज्ञान ३
वा प्रतिबध्यतानिरूपितप्रतिबंधकताच्छेदकविषयताघटितधर्मावच्छिन्नत्वविरहात्तदभाव विषयितायावन्हिव्याप्यवता

निश्चयप्रतिबंधकतानवच्छेदकत्वात्तादृशसंशयस्य पक्षतात्वापत्तेसंभवादिति वाच्यं वह्निसाध्यकस्थले वह्न्यभावव्याप्यवान्
निसंशयत्वस्य निष्ठविषयतया घटित धर्मावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यत्वस्य साध्यवत्ताग्रहत्वावच्छिन्नप्रतिबध्य
तानिरूपितप्रतिबंधकतावच्छेदकविषयितावच्छिन्नत्वस्य सत्त्वात्पक्षतात्वप्रसंगेन तद्विशेषणादाशेषणदानेचनत्रातिव्या
प्तिअनवकाशात् वह्न्यभावव्याप्यविषयितायावा धर्मप्रतिबध्यतावच्छेदकत्वात् इति न चैवं महानसीयवह्न्यभाववान्म
हानसीवह्न्यभाववान्पर्वत इति व्यावर्तकधर्मविषयाप्रतिबंधकतामादाय पर्वतो वह्निमान् इत्यनुमितौ पर्वतो महान्
५ सीयवह्निमात्रैवा इत्यास्य पक्षतापत्तिरिति वाच्यं ज्ञानवैशिष्ट्यावच्छिन्नत्वेन प्रतिबंधकताविशेषणात् इति ध्येयं केचित्तु
स्वनिष्ठप्रतिबध्यतावच्छेदकीभूतविषयिता घटितधर्मावच्छिन्नाप्रतिबंधकतानिरूपितप्रतिबध्यत्वे साध्यतावच्छेदका
वच्छिन्नप्रकारताशालिनिश्चयव्यापकप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नत्वमित्यत्र साध्यतावच्छेदका
वच्छिन्नप्रकारतायां स्वनिष्ठविष घटितावच्छेदकत्वविवक्षणान्न वह्निव्याप्यसाध्यकस्थले वह्निव्याप्याभावाभाववह्निमा

४ न्‌वन्हिसामान्याभाववानपक्ष इतिसंशयस्यपक्षतानप्रसंस्वनिष्ठंयद्वन्ह्यभाववत्तावच्छिन्नविषयितांनद्दघटितधर्मावच्छिन्नप्रतिबंधक
तानिरूपितप्रतिप्रतिबध्यताषवच्छेदकसाध्यतावच्छेदकावच्छिन्नप्रकारत्वस्याप्रसिद्धत्वात्‌नचवन्हिव्याप्यवन्हिमान्‌इतिज्ञाननिष्ठवन्हि
व्याप्यवन्हित्वावच्छिन्नप्रकारकत्वस्यवन्ह्यभाववत्ताज्ञानप्रतिबध्यतावच्छेदकतयासाध्यतावच्छेदकावच्छिन्नतपाचतादृशप्रकारत्वस्य
प्रसिद्धिरितिवाच्यं तादृशप्रकारितात्व्यापकतादृशप्रतिबध्यताछेदकस्यत्वविवक्षितत्वादित्यात्तानिक्यात्‌ वन्हिवन्हिव्याप्योभ
यसाध्यकानुमितौवन्हिव्याप्योभयाभावाभाववद्वन्हिमान्‌वन्हिसामान्याभाववान्‌वापक्ष इतिसंशयस्यपक्षताप्रसंगात्‌स्वनिष्ठबाधप्रति
बध्यतावच्छेदकीभूतविषयताघटितधर्मावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यत्वस्यस्वनिष्ठविषयिताघटितवन्ह्यभाववत्तानिश्च
यत्वरूपधर्मावच्छिन्नप्रतिबंधकप्रतिनिरूपितबध्यतावच्छेदकीभूतवन्हिवन्हिव्याप्योभयत्वावच्छिन्नप्रकारताशालिनिश्चयनिवर्त राम
नीयत्वंस्यचतादृशसंशयेसत्वात्‌नचस्वनिष्ठविषयताघटितइत्याद्वितीयविशेषणमपहायस्वनिष्ठविषयिताघटितधर्मावच्छिन्नप्रति ४
बंधकतानिरूपितप्रतिबध्यतावच्छेदकतानवच्छेदकधर्मानवच्छिन्नस्वनिष्ठबाधप्रतिबध्यतावच्छेदकीभूतप्रकारताघटितधर्मा

वच्छिन्नप्रतिबंधकत्वन्निरूपितप्रतिबध्यत्वेसती संतेन विवक्षणान्नैष दोषः उक्तस्थलेस्वनिष्ठत्यभावत्वावच्छिन्नविषयताघटितवन्ह्यभावव
त्तानिश्चयरूपधर्मावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतानवच्छेदकवन्हिव्याप्याभावाभाववत्त्वावच्छिन्नविषयितावच्छेदकतादृशाभा
भावाभववत्त्वावच्छिन्नतपास्वनिष्ठवाधयप्रतिबध्यतावच्छेदकीभूतावन्ह्यभाववत्त्वावच्छिन्नविषयिताघटितधर्मावच्छिन्नप्रतिबंधकतानिरूपित
व प्रतिबध्यतावच्छेदकतानवच्छेदकतानैच्छेदकमहानसीयत्वानवच्छिन्नत्वात् वन्ह्यसाध्यनौवत्तानिश्चयनिवर्त्तनीयत्वमित्यादिकमहापसाध्यव
त्तानिश्चयत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकतानवच्छेदकविषयितानवच्छिन्नत्वस्य तादृशप्रतिबध्यतायां निवेशनान्न वन्हिव्याप्य(
साध्यकस्थले वन्हिव्याप्याभावाभाववन्हिमान् वन्हिसामान्याभाववान्वा पक्ष इति संशयस्य पक्षतात्वंएताशसंशयनिष्ठप्रतिबध्यतायां
तादृशप्रतिबध्यतानिरूपितप्रतिबंधकतानवच्छेदकवन्ह्यभावत्वावच्छिन्नविषयित्वावच्छिन्नत्वात् यद्यप्युक्तकल्पे वन्हिवन्हिव्याप्योभयाया
भावाभाववन्हिमान्वन्हिसामान्याभाववान्वा पक्ष इति संशयस्य पक्षतात्वापत्तिः संभवंति साध्यवत्तानिश्चयत्वव्यापकप्रतिबध्यतानिरूपितप्र
तिबंधकतावच्छेदकवन्त्यभावविषयघटितधर्मावच्छिन्नत्वस्य तादृशप्रतिबध्यतानिरूपितप्रतिबंधकतानवच्छेदकविषयित्वानवच्छिन्नत्वए

ताद्दशसंशयस्यप्रतिबध्यतापांसत्वात्स्वनिष्ठविषयित्वघटितधर्मावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकीभूतवद्वेदकावच्छिन्नवन्हव

५ न्हिव्याप्योभयत्वावच्छिन्नप्रकारताशालिनिश्चयप्रतिवर्ज्जनीयत्वस्यताद्दशसंशयत्वाच्च तथापिताद्दशस्थलेएताद्दशसंशयसत्वेपिसिद्धत्वलक्षण

स्यत्वेनानाश्यत्वेपिसाध्यवत्तानिश्चयत्वव्यापप्रतिबध्यतायांताद्दशनिश्चयत्वव्याप्यत्वस्यनिवेशनीयतयापत्तिविरहादितिविभावनीयंसुधीभिः

पर्वतोमहानसीयवन्हिमान्इत्यनुमितौमहानसीयवन्हिमान्वन्हिसामान्याभाववान्वापक्षइत्याकारसंशयइतिविभावनीयंचमहानसीयव

न्ह्यभावसाध्यकस्थलेमहानसीयवन्हिमान्वन्हिसामान्याभाववान्वापक्षइतिसंशयस्यपक्षतात्वापत्तिःस्वनिष्ठमहानसीयवन्हिमत्तानिश्च

यात्मकवाधप्रतिबध्यतावच्छेदकीभूतवन्ह्यभावत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यत्वस्यसाध्यवत्तानिश्चयत्वव्यापकप्रतिबंधक

तानिरूपितप्रतिबध्यतावच्छेदकीभूतमहानसीयवन्हित्वावच्छिन्नत्वविषयितावच्छिन्नत्वस्यसत्वादितिवाच्यं साध्यवत्तानिश्चयेत्यादिनाता राम

द्दशनिश्चयत्वव्यापकप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकविषयतात्वपर्याप्त्यवच्छेदकत्वविवक्षणान्नमहानसीयवन्हित्वावच्छिन्न ५

विषयतात्वस्यनिरुक्तसंशयत्वघटकीभूतवन्हित्वावच्छिन्नविषयतात्वस्यपर्याप्त्यवच्छेदकताकप्रतिबध्यतावच्छेदकपर्याप्त्यधिकरणता

द्वितिमद्देकपरिशीलिनः पंथाः   यत्तु बाधनिश्चयप्रतिबध्यतावच्छेदकतापद्रूपावच्छिन्नतद्रूपावच्छिन्नस्वनिष्ठविषयित्वनिष्ठावच्छेदकताक
निबंधकतानिरूपितप्रतिबध्यतावाच्या अतोनवन्हिव्याप्यसाध्यकानुमितौ वन्हिव्याप्याभावाभाववन्हिमान् वन्हिसामान्याभाववान् वा
पक्ष इति संशयस्य पक्षतात्वापत्तिः यद्यपि बाधनिश्चयप्रतिबध्यतावच्छेदकतावच्छेदकं विषयतात्वमपि तदादायन दोषतादवस्थ्यं ।।
नच बाधनिश्चयप्रतिबध्यतावच्छेदकतावच्छेदकताऽपर्याप्त्यधिकरणत्वं वाच्यं महानसीयवन्हिसाध्यकानुमितौ महानसीयवन्हि
मान् वन्हिसामान्याभाववान् वा पक्ष इत्यस्यासंग्रहापत्तेः तथापि बाधनिश्चयप्रतिबध्यतावच्छेदकतावच्छेदकत्वातिरिक्तानवच्छि
न्नाया स्वनिष्ठविषयित्वनिष्ठावच्छेदकताकप्रतिबंधकताकतन्निरूपितप्रतिबध्यताशालित्वमित्यर्थः तथाचोक्तस्थले वन्हित्वावच्छि
न्नविषयतात्वरूपेण योऽतिरिक्तः तदवच्छिन्नस्वनिष्ठविषयत्वनिष्ठावच्छेदकताप्रतिबंधकतानिरूपितप्रतिबध्यताशालित्वात् न दृश
6 संशयसंग्रहः इति न चैवमेतादृशार्थे साध्यतानिश्चयनिवर्तनीयत्वदलं व्यर्थमिति वाच्यं वन्हिव्याप्याभावसाध्यकस्थले वन्हिमात्रेवेत्यस्य
पक्षतात्वापत्तेः नत्वमानो वर्सं अभावव्याप्यवानिसनुमितौ अभावव्याप्याभावाभाव अभाववान् अभावसामान्याभाववान् वा पक्ष इ

स्यपक्षतापत्तेः स्वनिष्ठविषयिताघटितधर्मावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यत्वं संशयत्वे स्वनिष्ठविषयित्वं च बाधनिश्चय
६ प्रतिबध्यतावच्छेदकत्वेन विशेषणीयं प्रतिबध्यत्वं साध्यवत्तानिश्चयप्रतिबध्यताचावच्छिन्नः त्वेन विशेषणीयं नवच्छेदकान्हिव्याप्यसा
ध्यकवन्हिव्याप्याभावाभाववन्हिमान्वन्हिसामान्याभाववान्वापक्षतादृशसंशयस्यपक्षतापत्तिः स्वनिष्ठवन्हिव्याप्याभावाभा
वहित्वावच्छिन्नविषयितायां वन्हिव्याप्याभाववत्तानिर्णयप्रतिबध्यतावच्छेदकत्वात्प्रतिबध्यतायावन्हिव्याप्यरूपसाध्यनिर्णय
प्रतिबध्यतावच्छेदकवन्ह्यभाववत्त्वावच्छिन्नविषयितावच्छिन्नत्वसत्त्वाच्चेतिवाच्यंप्रतिबध्यत्वस्यसाध्यताज्ञानप्रतिबंधकतावच्छेदकताव
च्छिन्नत्वेनापिनिवेशनीयत्वात् नचविषयितायांवानिश्चयप्रतिबध्यतावच्छेदकत्वविशिष्यणांव्यर्थमितिवाच्यं महानसीवन्हिसाध्यक
स्थलेवन्हिमान्नवेतिसंशयपक्षतापत्तिवारणायतन्निवेशात्नचबाधनिश्चयप्रतिबध्यतावच्छेदकत्वनिवेशेपिवन्ह्यभावरूपबाधनिश्च राम
यप्रतिबध्यतावच्छेदकत्वसत्त्वात्तद्दोषतादवस्थ्यमितिवाच्यंबाधनिश्चयप्रतिबध्यतावच्छेदकइत्यस्यसाध्यतावच्छेदकपर्याप्तावच्छेद ६
कतानिरूपितत्वविशिष्टप्रकारतात्वावच्छिन्नावच्छिन्नवन्हिसाध्यकस्थलेमहानसीयवन्ह्यभावएवबाधः नचप्रतिबध्यतायांसाध्यवत्ता

छेदकताकप्रतिबध्यतानिरूपितप्रतिबंधतावच्छेदकीभूतविषयित्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकत्वात् महानसीयवन्हिसा
ध्यकः स्थले महानसीयवन्ह्यभाववएव बाधः नच प्रतिबध्यतायां साध्यवत्तानिर्णयप्रतिबध्यतावच्छेदकावच्छिन्नत्वं स्वघटनद्यावर्जनीयं
उक्तसंशयीयप्रतिबध्यत्वस्य महानसीयवन्ह्यभावविषयत्वावच्छिन्नस्य साध्यवत्तानिर्णयः प्रतिबंधकतावच्छेदकावच्छिन्नत्वविरहादि
तिवाच्यं वन्ह्यभावव्याप्याभाववत्साध्यकस्थले वन्ह्यभावव्याप्याभावाभावव्याप्यवन्ह्यभाववान् वन्हिमान्वा पक्ष इत्येतादृशधीभाववन्
न्ह्यव्याप्यवत्पक्षनिर्णयप्रतिबध्यवच्छेदकीभूतत्वनिष्ठवन्हिवच्छिन्नविषयत्वघटितधर्मावच्छिन्नप्रतिबंधकतानिरूपितप्र
तिबध्यत्वस्य साध्यवत्तानिर्णयप्रतिबंधकतावच्छेदकीभूतवन्ह्यभावव्याप्याभावाभावव्याप्यवत्त्वविषयत्वावच्छिन्नत्वात् तत्रा
तिव्याप्त्यापत्तेः तन्निवेशे तु तादृशविषयतायाः साध्यवत्तानिर्णयप्रतिबध्यतावच्छेदकत्वविरहात् नातिव्याप्तिः वन्ह्यभावव्या
7 प्याभावाभाववान् वन्ह्यभाववान् वन्हिमान्वा पक्ष इति संशयस्य पक्षतात्वमिष्टमेव अन्यथा पर्वतो वन्हिमान् इत्यादौ वन्हिमान्प्र
पत्वविशिष्टवन्ह्यभाववान्पक्ष इत्यादावप्यतिव्याप्तिः स्यात् युक्तेस्तुल्यत्वात् वन्हिव्याप्यवान् वन्ह्यभाववान्वा इत्यस्य न संशयत्वं आ
हार्यं

संशयानभ्युपगमात् ननु साध्यवत्तानिश्चयप्रतिबध्यत्वे सति स्वनिष्ठविषयिताइत्यादि कथं नोक्तं इति चेन्न पर्वतो वह्निव्याप्याभाववानित्यादौ
७ वह्निव्याप्याभावाभाववान् पर्वतो वह्निमान् न वा इति संशयस्य पक्षतात्वापत्तिः नच बाधज्ञानत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिब
ध्यतावच्छेदकत्वं स्वनिष्ठविषयितायां कथं नोक्तं इति वाच्यं महानसीयवन्ह्यभाववानित्यादौ महानसीयवह्निसामान्याभाववान्न वा
पक्ष इत्यादिसंशयासंग्रहात् अतो बाधज्ञानत्वव्यापकप्रतिबंधकताया ऽप्रसिद्धत्वात् निश्चयत्वव्यापकत्वनिवेशने च बाधः ज्ञान(
त्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वं वाच्यं पर्वतो वह्निव्याप्यवानित्यादौ वह्निमान् वह्निव्याप्यवान् शुद्ध
पर्वतत्वावच्छिन्नविशेष्यकशुद्धसंयोगसंसर्गकशुद्धवह्नित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नप्रतिपर्वत्वावच्छिन्नविशेष्यतानि
रूपितसंयोगसंसर्गावच्छिन्नवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यताशालिसंशयो राम
हेतुरिति अवपर्वतांशे शुद्धत्वानिवेशे नीलपर्वतो वह्निमानित्यनुमितेः पर्वतत्वावच्छिन्नविशेष्यताकशुद्धसंयोगावच्छिन्नशुद्ध ७
वह्नित्वावच्छिन्नविधेयताकानुमितितया व्यभिचारः पर्वतत्वावच्छिन्नविशेष्यकसंयोगसंबंधावच्छिन्नवह्नित्वावच्छिन्नप्रकारताशालिनि

संशयानभ्युपगमात् ननु श्चयत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यताश्रयसंशयं विपि केवलनीलपर्वतो वह्निमान्नवेति संशयात्ता
दृशानुमितेरुत्पादात् अतः शुद्धत्वं पर्वतविशेषणं संयोगांशे शुद्धत्वानिवेशे निरुक्तप्रतिबध्यताशालिसंशयं विनापि जायमानायाः पर्वतः
पर्वतीयसंयोगेन वह्निमानित्यनुमितिः शुद्धपर्वतत्वावच्छिन्नविशेष्यकसंयोगावच्छिन्नशुद्धवह्नित्वावच्छिन्नविधेयताकायां व्यभिचारः स्या
दतः शुद्धयोगि विशेषणं एवं रीत्या शुद्धवह्निमाननुमितौ व्यभिचारः स्यादतो वह्नावपि शुद्धत्वविशेषणं निश्चयत्वावच्छिन्नं निःश्चयत्व
पकं अतो महानसीयवह्निसाध्यकस्थले महानसीयवह्निसामान्याभाववान्वा पक्षः इति संशयस्य पक्षतात्वानुपपत्तिः नवह्निमानि(
त्यनुमितौ महानसीयवह्निमान्नवेति संशयस्य पक्षतात्वापत्तिः इति महाचार्य्येनाभिहितं ननुपतावच्छेदकावच्छिन्नविशेष्यता
निरूपितसाध्यतावच्छेदकपर्य्याप्तावच्छेदकताकप्रकारतानिष्ठावच्छेदकताकप्रतिबंधकतानिरूपितप्रतिबध्यतानिवेशेनैव उक्ता
8 नुपपत्त्यापत्तिवारणसंभवे कथं तादृशनिश्चयत्वव्यापकनिवेशनमिति नच वह्निमान्महानसीयवह्निमान् इति ज्ञानकालीनवह्नि
मान् पर्वतविषयकनिश्चयत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यताशालिनः पर्वतो महानसीयवह्निमान्नवेति संशयस्यप

र्वतो वह्निमानित्यनुमितौ पक्षतात्वापत्तिरिति वाच्यं ज्ञानवैशिष्ट्यानवच्छिन्नत्वेन प्रतिबंधकताया विशेषात् न च पर्वतो वह्निघटोभयवा
८ नैवेति संशयं प्रति वह्नित्वावच्छिन्नप्रकारतानिरूपितानिसति घटत्वावच्छिन्नप्रकारतानिरूपिताया विशेष्यताशालिनिश्चयत्वेन ए
कत्रद्वयमित्यादिरीत्या जायमानावा वह्निघटवानिति निश्चयोपत्र वह्निघटोभयवान् इति निश्चयपदस्य धारणरूपेणैव प्रतिबंधक
त्वात् वह्नित्वपर्य्याप्तावच्छेदकताकप्रकारतानिष्ठावच्छेदकताकप्रतिबंधकतानिरूपितप्रतिबध्यतानिरोशालित्वकसंशयस्य शुद्धवह्नित्वा
वच्छिन्नसाध्यकस्थले पक्षतात्वापत्तिरतो व्यापकतारूपावच्छिन्नं निवेशितमिति वाच्यं साध्यतावच्छेदकावच्छिन्नप्रकारत्वत्वाप्रका
रनिरूपितपर्वतत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रतिबंकतानिवेशात् न च वह्निसाध्यकस्थले वह्निमान् पर्वतवान्न वेति संशयस्य
पक्षतात्वापत्तिस्तत्र संशयं प्रति बंधकतावच्छेदककोटौ वह्नित्वावच्छिन्नप्रकारत्वान्यप्रकारत्वानिरूपितपर्वतत्वावच्छिन्न राम
विशेष्यतापादतो व्यापकत्वनिवेशनमिति वाच्यं: विशेष्यतायाः प्रकारत्वानवच्छिन्नत्वनिवेश इति चेत् न एतत्कल्पापेक्षया व्याप ८
कत्वनिवेशवैयर्थ्यात् इति विभावनीयं ननु पक्षतावच्छेदकावच्छिन्नविनानिरूपितप्रकृतसाध्यतावच्छेदकसंसर्गावच्छिन्न

प्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताकानुमितित्वव्यापकप्रतिबंधकत्वमेवनिवेश्यतां किंगुरुतरनिश्चयत्वनिवेशेनइतिचेन्नरत्नाकोषम
तेसंशयाकारानुमितेरपिस्वीकारात्तन्मतसाधारण्यानुरोधेननिश्चयत्वनिवेशइति ० अत्रोच्यते इतिकल्पेयद्यपिस्वनिष्ठविषयतायांवा
धग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकत्वनिवेशेपिवह्निव्याप्यसाध्यकस्थलेवह्निमान्नवेतिसंशयस्यपक्षतात्ववारणसंभवे किं
गुरुतरबाधनिश्चयत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकत्वनिवेशेनतथापिवह्निव्याप्यसाध्यकस्थलेवह्निव्याप्याभाव
दवृत्तिवह्निमान्वह्निसामान्याभाववान्वापक्षइतिसंशयस्यपक्षतात्वप्रसंगः वह्निव्याप्याभाववान्इतिबाधनिश्चयस्यप्रतिबंधकतावच्छे
दकीभूतयद्वह्निव्याप्याभाववदवृत्तिवह्निमान्ज्ञानीयवह्निव्याप्याभाववदवृत्तित्वावच्छिन्नविषयित्वंतस्यचस्वनिष्ठरूपानवघटितधर्मा
वच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यत्वस्यसाध्यवत्तानिश्चयनिर्णेनीयत्वस्यतादृशसंशयेसत्वात् अथवह्निव्याप्यसाध्यकानुमि
9 तौवह्निव्याप्याभावाभाववह्निमान्वह्निसामान्याभाववान्वापक्षइत्यस्यपक्षतात्वापत्तिः स्वनिष्ठबाधप्रतिबध्यतावच्छेदकीभूतायाव
ह्निव्याप्याभावाभाववह्नित्वावच्छिन्नविषयिताघटितोयोवह्निव्याप्याभावाभाववह्नित्वावच्छिन्नावच्छिन्नविषयिताघटितोयोवह्निव्याप्याभावा

भावह्नित्वावच्छिन्नविषयितापटितोयोवह्निव्याप्याभावाभाववह्नित्वावच्छिन्नावच्छिन्नविषयितापटितोयोवह्निव्याप्याभावाभाववह्निमत्तानिश्च
९ यत्वरूपधर्मस्तदवच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यत्वस्यवह्निव्याप्यवत्तानिश्चयत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेद
कावच्छिन्नत्वस्यचतादृशसंशयत्वादितिचेन्नसाध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नत्वमपहायसा
ध्यवत्ताग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूतविषयताघटितधर्मावच्छिन्नत्वस्यसंशयघटकप्रतिबध्यतायांनिवे
शनीयत्वात्वह्निसामान्याभावविषयवह्निव्याप्यवत्तानिश्चयत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतानवच्छेदकतयातादृशसंशयत्व
घटकप्रतिबध्यत्वस्यवह्निसामान्याभावविषयताघटितधर्मावच्छिन्नत्वेपिक्षतिविरहात्नचस्वनिष्ठविषयतायांबाधप्रतिबध्यतानिवेश
शनवैयर्थ्यं वह्निव्याप्यसाध्यकस्थलेवह्निमात्त्वेतिसंशयत्वघटकप्रतिबध्यतायांसाध्यवत्ताग्रहत्वावच्छिन्नवह्निमांश्चपर्वतइत्याद्यवच्छे राम
दकधर्मदर्शनविधयाबाधज्ञानप्रतिबंधकतावच्छेदकीभूतवह्निविषयतामादायपर्वतोवह्निमान्नवाइत्यादिसंग्रहापतिः वह्निव्याप्यवान् ९
इत्यादौवह्निव्याप्याभावाभाववह्निमान्वह्निसामान्याभाववान्वापक्षइत्यस्यवारणायएकरूपेणनिवेश्यंतथाचबाधनिश्चयप्रतिबध्यताव

छेदकताश्रयो धर्मस्तदितरधर्मानवच्छिन्नावच्छेदकताकत्वं स्वनिष्ठविषयिताघटितधर्मावच्छिन्नप्रतिवंधकतायां विवक्षितं अथवा वाधनिश्चयप्र
तिवध्यतावच्छेदकतावच्छेदकं यद्वह्निव्याप्याभावाभाववविषयतात्वं तस्य संशयत्वघटकप्रतिवंधकतावच्छेदकत्वाभावान्न दोषः तदितरध
र्मानवच्छिन्नत्वइत्यादिनिवेशात् महानसीयवह्निसाध्यकस्थले महानसीयवह्निमान् वह्निसामान्याभाववान्वा पक्ष इत्यादौ न पक्षतात्वहा
निः नच वह्निव्याप्याभाववान् इत्यादौ वह्निव्याप्याभावाभाववह्निमान् वह्निसामान्याभाववान्वा पक्ष इत्यस्य पक्षतात्वापत्तिः वाधनिश्चयप्र
तिवध्यतावच्छेदकीभूतवत्त्वभावविषयताघटितधर्मावच्छिन्नप्रतिवंधकतानिरूपितप्रतिवध्यतायाः साध्यवत्तानिश्चयप्रतिवध्यतावच्छे
दकावच्छिन्नत्वादिति वाच्यं साध्यवत्तानिश्चयप्रतिवध्यतावच्छेदकोयो धर्मस्तदितरधर्मानवच्छिन्नावच्छेदकताकत्वेन संशयत्वघटकप्र
तिवध्यताविशेषणात् तदितरधर्मानवच्छिन्नेत्यादिविशेषणात् महानसीयवन्ह्यभाववावान् इत्यादौ महानसीयवह्निमान् वह्निसामान्या
10 भाववान्वा पक्ष इत्यास्य न पक्षतात्वहानिः नच महानसीयवह्निमान् इत्यादौ महानसीयवह्निमान् नवा पक्ष इत्यस्य संग्रहापत्तिः वाध
निश्चयप्रतिवध्यतावच्छेदकत्वादेरेकरूपेण निवेशितत्वादिति वाच्यं ॥ ० ॥ पक्षताग्रंथस्य वा पदार्थः ॥ ॥ छ ॥ छ ॥ छ ॥ १

१०

राम
१०